
Sri Sri Jagadguru Shankaracharya Mahasamsthanam
Dakshinamnaya Sri Sharada Peetham, Sringeri

anugraha bhashana video series volume one

# Avoid Sin, Develop Devotion



Sri Gurubhyo Namaha

## List of Sanskrit Verses in the Anugraha Bhashana

1. वरमभयमुदारं पुस्तकं चाक्षहारं
मणिवलयमनोज्ञैः पाणिपद्मैर्दधाना ।
सितवसनललामा कुन्दमुक्ताभिरामा
वसतु शशिनिभास्या वाचि वाग्देवता नः ॥

2. इत्येवं श्रुतिनीतिसंप्लवजलैः भूयोभिराक्षालिते ।
येषां नोपदमादधासि हृदये ते शैलसाराशयाः॥
किन्तु प्रस्तुतविप्रतीपविधयोप्युच्चैर्भवच्चिन्तकाः ।
काले कारुणिक त्वयैव कृपया ते रक्षणीया नराः॥

3. परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाऽभिनिवेशश्च त्रिविधं मानसं स्मृतम् ॥

4. तस्माद्यत्पुरुषो मनसाभिगच्छति । तद्वाचा वदति ।
तत्कर्मणा करोति ।

5. पारुष्यमनृतं चैव पैशुन्यञ्चापि सर्वशः ।
असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥

6. सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ।

7. अधर्मेणैधते पूर्वं ततो भद्राणि पश्यति ।
ततस्सपत्नान् जयति समूलस्तु विनश्यति ॥

8. रामवद्वर्तितव्यम् । रावणवन्नवर्तितव्यम् ।

9. राशब्दोच्चारणादेव मुखान्निर्यान्ति पातकाः ।
पुनः प्रवेशभीत्यात्र मकारस्तु कवाटवत् ॥

10. एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये ।

11. सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाऽविरोधेन ये ।

12. तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये ।

13. ये तु घ्नन्ति निरर्थकं परहितं ते के न जानिमहे ।

14. अदत्तानामुपादानं

15. हिंसा चैवाविधानतः ।

16. परदारोपसेवा च त्रिविधं कायिकं स्मृतम् ।

17. मात्रृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पश्यति ॥

18. विद्यास्समस्तास्तवदेविभेदाः स्त्रियस्समस्तास्सकलाजगत्सु ।

19. मानसं मनसा भुङ्क्ते।

20. यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥

21. न मे द्वेष्योऽस्ति न प्रियः ।

22. ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।

23. मूर्खो वदति विष्णाय विद्वान् वदति विष्णवे ।
उभयोस्सदृशं पुण्यं भावग्राही जनार्दनः ॥

24. भक्त्या तुष्यति केवलं न तु गुणैः, भक्तिप्रियो माधवः ।

Also Available At
http://www.sringerisharadapeetham.org/publications/video/